International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(1): 58-65
© 2021 IJSR
www.anantaajournal.com
Received: 23-10-2020
Accepted: 02-12-2020

**Swapan Pal**
Swami Vivekananda Research Centre, Ramakrishna Mission Vidyamandira, Belur Math, Howrah, West Bengal, India

**Corresponding Author:**
**Swapan Pal**
Swami Vivekananda Research Centre, Ramakrishna Mission Vidyamandira, Belur Math, Howrah, West Bengal, India

# नाट्योत्पत्तिः समीक्षा

**Swapan Pal**

**निबन्धसारः –**

साहित्यमीमांसकैः काव्यं द्विधा विभज्यते – श्रव्यकाव्यं दृश्यकाव्यञ्चेति। दृश्यकाव्यं तु नाट्यमित्यभिधयाभिहितिम् । अस्य नाट्यस्य वीजं कुत्र कदा वा प्राथम्येन प्रथितं कश्चास्य पालनकर्तेति अस्माभिर्न ज्ञातः । नाट्यस्योत्पत्तिं विकाशविषयञ्चावलम्ब्य प्राच्यपाश्चात्यगवेषकैः बहुधा चर्चा कृता। अद्यापि एतत् विषयमधिकृत्य गवेषणा प्रचलिता । तथापि सर्वजनमान्यमतं नाविष्कृतम्। प्राचीनाः अर्वाचीनाश्च बहवः नाट्यतत्त्वसारमर्मज्ञाः एतद्विषये युक्तिजालैः स्वमतं प्रतिष्ठितवन्तः। तेषां बहुविधानि मतानि निबन्धेऽस्मिनालोच्य नाट्योत्पत्तेर्वृत्तान्तं विनिर्मातुं प्रयासः क्रियते मया।)

**शब्दसारः** - नाट्योत्पत्तिः, शिवोत्सवः, नृत्तम्, नृत्यम्, नाट्यम्, भरतः, संवादसूक्तम्, धर्मोत्सवः, अनुकरणम्, अयारिस्टट्ल्, ग्रीसदेशः, मिशरदेशः ।

## प्रस्तावना

### प्रागैतिहासिकयुगे नाट्योत्पत्तेः प्रागवस्था

नृतात्विकगबेषकैर्बह्वायासं स्वीकृत्य पृथिव्यां मानवार्विभावकालः स्थिरीकृतः । दशलक्षाधिकवर्षप्राक् आदिमानव आविर्बभूव। प्राथमिकस्तरे तु पिथेक्यान्थ्रोपास् इरेकटास्-नामकः मानवो जातः। ततः पिकिङ्मानवः, ततःपिल्ट्डाउन्मानवः आगतः। परवर्तिनि काले नब्यप्रस्तरयुगे 'क्रोम्याग्नन्' इति मानवसम्प्रदायो जनिं लेभे । ६५००प्राक्ईषवीये वर्षे आधुनिकमानवः सम्प्रदायः (होमो स्यापियेन्स्) आविर्बभूव [1]। आदिममानवाः वनप्रदेशेषु परिभ्रमन्तः जीवनधारणार्थं पशून् हत्वा चखादुः प्राकृतिकजलाशयाच्च जलं पापुः । श्वापदसङ्कुलवन्यजीवनं सदा भीतिप्रदायकमासीत्। अतिवर्षणानावर्षणदावानलवज्रपातादिभ्यः प्राकृतिकविपर्ययेभ्यः मानवाः त्रस्ताः आसन्। आत्मरक्षार्थं प्रजननवृत्तये च क्रमेण आदिममानवाः यूथोबद्धा अभवन् । गोष्ठीबद्धो मानवः आदौ तु हस्तपदादिभिः प्रमुखाङ्गैः मनोगतभावं प्रकाशयामास। आकारेङ्गितभ्यां परस्परयोः संयोगो साधितः [2]।

प्रस्तरवृक्षशाखाप्रभृतिभिरस्त्रैः पशून् हत्वा आदिममानवाः अपक्वमांसं खादितवन्तः। परवर्तिनिकाले गोष्ठीबद्धमानवाः मृगयालब्धपशूनग्निपक्वं कृत्वा भक्षयाम्बभूवुः । आहारकाले ते आनन्दोल्लाससहयोगेन नृत्यं गीतञ्चाकुर्वन्। एवं प्रकारेण नृत्यगीतयोरुद्भवः संसाधितः । मृगयागमनात् प्राक् ते मानवा: स्वान् द्विधा विभज्य मृगयादृश्यस्याभिनयं चक्रुः । प्राचीनगुहाचित्रे एतादृशं चित्रं चित्रितम् [3]। अनेन तेषां मानससंस्काराः प्रकाशिताः। अनुकरणवृत्तिः सहजतया अनुशीलिता ।

**अतिवर्षणानावर्षणदावानलवज्रपातादिभ्यः**
प्राकृतिकविपर्ययेभ्यः त्रस्ताः मानवाः सर्वशक्तिमयीं प्रकृतिं रक्षाकारिणीरूपेण कल्पितवन्तः। प्रकृतितुष्टये विविधोपायः तैः गृहीतः। जीवनसारल्यं क्रमेणापगतम्। बहुविधानि विघ्नानि मानवजीवनं चञ्चलीकुर्वन्ति स्म। अतो मानवैर्विविधाः प्राकृतिकशक्तयः पृथक् पृथग्देवत्वेन स्वीकृताः । मानवाः देवपूजाकाले नृत्यगीताभ्यां देवान् तुतुषुः । देवार्चनामुद्दिश्य नृत्यगीते जाते । नृत्यं हि सर्वेषां कलानां जननी। [4] साम्प्रतिककालेऽपि भारतवर्षस्य आन्दामाननिकोवरद्वीपपुञ्जस्थिता जारोया इति उपजातिः नृत्यगीताभ्यां देवानर्चयतीति परिलक्ष्यते। तस्मात् कालानुक्रमेण नाट्यं प्रजायते [5]।

**भारतीयनाट्योत्पत्तिः - भारतीयनाट्योत्पत्तौ अनार्यप्रभाववादः शिवोत्सवश्च**
भारतीयः नाट्योत्पत्तिकालस्तु कालगभीरे निमज्जमानः अस्ति । सुप्राचीनकालगतयोर्ग्रीकमिशरसभ्यतयोः यद्यपि सुप्राचीननाट्यस्य निदर्शनमस्माभिः परिप्राप्तं तथापि भारतीयनाट्योत्पत्तेरितिहासः अस्माभिरज्ञातः। प्राचीनार्वाचीनाः नाट्यतत्त्वविबुधाः भारतीय-नाट्योत्पत्तेः कालमुन्मोक्तुं सततः आत्मानं नियोजितवन्तः। विभिन्ने काले बहुभिर्नाट्यतत्त्वज्ञैः बहुविधानि मतानि उपस्थापितानि। एतेषु मतेषु शेल्डनेन्दुशेखरमन्मथमोहन-वसु-महाभागानां भारतीयनाट्योत्पत्तौ अनार्यप्रभाववादोऽन्यतमः।
भारतवर्षे यदा आर्यजातेरागमनं संघटितं तत्प्रागेव सुसभ्यद्राविडजातिस्तथा अनार्यगणोऽत्र पत्तनमधिष्ठाप्य वाणिज्येण ऋद्धिं संप्राप्य नृत्यगीतविविधसांस्कृतिकवैचित्रसहयोगेन कालं नयति स्म। [6] तत्र नगरपरिकल्पनायाः सुनिर्दिष्टं प्रमाणं परिप्राप्तम्। शिल्प-स्थापत्य-चित्रकला-प्रभूतानि शिल्पानि सम्यक्तया विकशितानि।
द्राविडसभ्यतायां सूर्यपूजाप्रचलनमासीदिति पुरातात्त्विकैः स्वीकृतम्। सभ्यतायाः उषालग्ने मानवानां मुख्यप्रयोजन्मासीत् खाद्यम्। अनार्याः ख्याद्यप्रदायकदेवत्वेन सूर्यमुपासन्ति स्म। कालवशात् मानवाः म्रियन्ते। परन्तु अस्यां धरायां चिरं जीजिविषति मानवः। अपत्यं प्रसवात् चिराय धरायां ते जीवितुमिच्छन्ति। अतो खाद्यप्रदायकः प्रजननशक्तिबर्धकश्च सूर्यदेवः द्राविडैः पूजितो ऽभवत्। ऋतुभेदात् सूर्यकिरणसम्पातस्य प्रावल्यं कदापि बर्धते कदापि च मन्दायते। क्रान्तिवृत्तस्य चत्वारि सन्धिस्थलानि विद्यन्ते- कर्कटक्रान्तिः, शारदक्रान्तिः, मकरक्रान्तिः, वासन्तक्रान्तिश्चेति। रवेः मन्दकिरणात् प्रकृतिदेव्याः उत्पादिकाशक्तिः दुर्वलतां गता। पुनः सूर्यतेजबर्धनात् शस्योत्पादिकाशक्तिरपि बृद्धिं प्राप्ता। यस्मिन् क्रान्तिकाले सूर्यदेवस्यागमनकारणात् धरित्री शस्यपूर्णा जाता तस्मिन्नेवकाले मानवहृदयमानन्दसागरे निमग्नोऽभवत्। तदा द्राविडाः एकस्मिन् स्थाने समवेतं भूत्वा सूर्यदेवमर्चयाम्बभुवुः। अतो कालनियामकमहाकालरुपः सूर्यदेवः अर्चितोऽभवत्। कालवशात् सूर्यदेवस्य गुणसंयुता शिवमूर्तिः कल्पिता द्राविडैः। प्रातःकालीनः सूर्यः रक्तिमवर्णं, अस्तगामी सूर्यदेवोऽपि लोहितवर्णं च धारयति। द्राविडभाषायां 'शिवप्पु' इति शब्दस्यार्थः लोहितवर्णः। शिवशब्दः शिवप्पुशब्दश्च समधातुजशब्दः । परवर्तिनि काले शिवात्मजः गणपतिस्तथा गणेशदेवः रक्तिमवर्णत्वेन अनुमितः। शिवस्य पूर्णावयवमूर्तिः प्रजाबर्द्धकलिङ्गमूर्तिश्चेति मूर्तिद्वयं द्राविडजातिना पूजितम्। पुरा पृथिव्यां विविधेषु प्राचीनदेशेषु एवम्विधस्य शिवमूर्तेरस्तित्वे नानाविधं प्रमाणं परिप्राप्तम्। प्राचीने मिशरे ओसिरिसदेवः, ग्रीसदेशस्य दिओनुसिओसदेवः, अशियामाइनरप्रदेशानां हिट्टाइट्देवता तेशुवदेवः, जापानदेशस्य शिउअदेवश्च शिवदेवोसमो देवाः आसनिति अधुना गवेषकैः अनुमिताः। भारतवर्षस्य उत्तर-पश्चिमसीमान्ते मोहेञ्जोदाड इति नामधेये प्राचीने नगरे त्रिशीर्षक-दीर्घकेश-भूजङ्गशोभित-योगासनोपविष्ट शिवमूर्तिः, कश्चित् च हस्ति-व्याघ्र-महिष-मृगादि-पशुवेष्टित-वृक्षतलाश्रितध्यानमूर्तिः पुरातात्त्विकैः संगृहीतः। शिवस्य महाकालरूपत्वे तु प्रमाणमं भूजङ्गभूषणत्वम्, सुप्राचीनकालात् सर्पः कालस्य प्रतीकत्वेन कल्पितः। सर्पस्य कुण्डलाकृतिः क्रान्तिवृत्तेन सह तुलिता। अतः सर्पस्य अपरा संज्ञा अनन्तः, सर्वध्वंसत्वाच्च 'शेषः' इति। द्राविडसभ्यतायां शिवपूजाकाले नृत्यगीतयोर्विधानं विहितम्। 'ज्ञान-संहितायां' शिवार्चनकाले नृत्यगीतप्रभृतिभिः सह पूजा विहिता। तत्र नृत्यरतमुद्राविशिष्ट्यानि प्रायः पञ्चशतप्रस्तरविग्रहानि परिप्राप्तानि । अध्यापक-मन्मथमोहन-वसु-महाभागानां नये तु अनार्याणां शिवोपासनां केन्द्रीकृत्य नृत्यगीतयोः उद्भवो जातः। प्राचीने ग्रीसदेशे वसन्तकालानुष्ठितं दिओनुसियास-उत्सवमुपलक्ष्य ग्रीकवासिनः नृत्य-गीतमकुर्वन्। तस्मादेव कालक्रमेण नाट्यस्योद्भवः। इउरोपे ख्रीष्ट्मास-इस्टारानुष्ठाने अभिनयार्थं नाट्यमजायत्। इत्थं भरतवर्षे शिवोत्सवमुपलक्ष्य नाट्यं समुद्भवम् इति सिद्धान्तः। एतदर्थं देवशिवः नटराज-नटेश-नटनाथ-महानट-आदिनटादिभिरभिधाभिः आख्यातः [7] । आधुनिक-कालेऽपि पूर्वतनस्य महेञ्जदाडोशिवोत्सवं महीशूर - त्रिवाङ्कुरप्रदेशद्वयेषु प्रचलितम्। अधुना शिवोत्सवे नाट्यमप्यभिनीतं भवति [8]। द्विविधसोपानमतिक्रम्य नाट्यस्य उत्पत्तिः। प्रथमं सोपानं नृत्तं, द्वितीयं तु नृत्यम्। प्राचीनस्य द्राविडगणस्य नृत्याभिनयसाक्षीत्वेन वर्तमानकालेऽपि केरलप्रदेशानां 'कूटनृत्यम्' विद्यते। तेषु कूटनृत्येषु 'चाकियार-नामियार-कूटियातम्' इत्याभिधानि-

कूटानि उल्लेखयोग्यानि। केरलप्रदेशानां 'कथाकलि' नृत्यमपि एवंविधं वैशिष्ट्यपूर्णम्।

**नाट्यशास्त्रगतो नाट्योत्पत्तिविषयकः दैवोत्पत्तिवादः**

संस्कृतव्याकरणशास्त्रे महर्षिः पाणिनिर्यथा वैयाकरणसंसदि मूर्द्धन्यीभूतस्तथा नाट्यतत्त्वसागरमन्थनकारो महामुनिर्भरतः संस्कृतनाट्यसाहित्ये सर्वोत्तमं स्थानमधिकृत्य विराजते। तस्य षट्त्रिंशदाध्यायविशिष्टनाट्यशास्त्रस्य प्रथमे अध्याये किम्प्रकारेण नाट्यमाविर्बभूव इति समुपवर्णितम्। महर्षिः भरतो निजमुखेन ऋषीणां जिज्ञासायां नाट्यस्य दैवोत्पत्तिवादं वर्णितवान्। ब्रह्मा ऋग्वेदात् पाठ्यं, सामवेदात् गीतं, यर्जुवेदात् अभिनयान्, अथर्वणात् च रसं समाकृष्य नाट्यवेदं सृष्टवान्। प्रजापतिः ब्रह्मा नाट्यवेदं सृष्ट्वा तस्य प्रयोगार्थं भगवते इन्द्राय आदिदेश। असक्षमात् इन्द्रादिदेवगणः नाट्यवेदस्य प्रयोगे अस्वीकृतवान्। ब्रह्मादेशात् भरतः शतपुत्रेण सह नाट्यवेदस्य प्रयोगं कृतवान्। इन्द्रध्बजमहोत्सवे 'देवासुरसंग्रामममि'ति नाटकमभिनीतम्। अभिनयेऽस्मिन् दैत्यदानवनाशनं संघटितम्। अतो विरूपाक्षादयः असुराः क्रुद्धाः अभवन् । ते नाट्यकर्मणि विघ्नमुत्पादयित्वा नटानां इन्द्रजालैः बद्ध्वावशं कृतवन्तः। इन्द्रः ध्यानमार्गेण सर्वमिदं वृत्तान्तं ज्ञात्वा जर्जरेण तानसुरान् जर्जरीकृतवान्। देवशिल्पी विश्वकर्मा भरतादेशेन नाट्यगृहं निर्मितवान्। अनन्तरं अमृतमन्थन इति समवकारः त्रिपुरदाहश्चेति डिमः अभिनीतौ। नाट्यशास्त्रस्य षट्त्रिंशाध्याये भरतपुत्राणां मुनीनामभिशापात् मर्त्ये आगमनवृत्तान्तमुपवर्णितम्। नाट्यकलाकुशलाः भरतपुत्राः ऋषीनुपहसन्ति स्म।

क्रमेण धरायां नहुषः इति नृपतिरिन्द्रसाजुज्यमुपलभ्य पुनः नाट्यं मर्त्ये प्रवर्तनाय भरतमनुरुरोध। पुर्वे उर्वश्या मर्त्ये नाट्यं प्रचारितम्।परन्तु उर्वश्याः प्रणाशशोकेन उन्मादोपरते पुरूरवसि नाट्यकला विनाशं प्राप्तम्। पुनः नहुषानुरोधेन भरतः स्वपुत्रान् मर्त्ये नाट्यप्रवर्तनाय प्रेरितवान्। कोहलादिभिः नाट्यं प्रचारितम्।

**नाट्यशास्त्रेतरनाट्यग्रन्थेषु नाट्योत्पत्तिवादाः**

**अ.अभिनयदर्पणम्**

आचार्यनन्दिकेश्वरेण तदीये अभिनयदर्पणे नाट्योत्पत्तिः समुपवर्णिता। महर्षिः ब्रह्मा ऋग्वेदात् पाठ्यं, सामवेदात् गीतं, यजुर्वेदात् अभिनयमथर्वणाद् च रसं समाकृष्य नाट्यवेदं सृष्ट्वा भरताय समर्पयामास। भरतमुनिः गन्धर्वाप्सरैः सह शिवसमीपे नाट्यवेदस्य प्रयोगं कृतवान्। तदा शिवानुरोधेन तण्डुः भरतमुद्धतनृत्यं शिक्षयामास। तण्डुना उपदिष्टं नृत्यं ताण्डवनृत्यमिति प्रसिद्धम्। शिवपत्नी पर्वती वाणासुरदुहितरमुषां लास्यनृत्यं शिक्षितवती।[9] एवम्प्रकारेण ताण्डवलास्ययुक्तनाट्यं भूलोके प्रतिष्ठितम्। नन्दीकेश्वरेण तु आवेदितम्-"एवं परम्पराप्राप्तमेतल्लोके प्रतिष्ठितम्"। इति।[10]

**आ.भावप्रकाशनम्**

नाट्योत्पत्तिविषये शारदातनयकृतभावप्रकाशने वैमत्यं परिलक्ष्यते। तत्र शिवः नाट्यवेदं विनिर्माय नन्दिकेश्वराय प्रदत्तवान्। नन्दीकेश्वरः ब्रह्माणं नाट्यवेदं शिक्षयामास। ब्रह्मापि भरतमुनये नाट्यवेदस्य शिक्षां ददौ। मर्त्ये नाट्यस्य प्रसारणार्थं ब्रह्मादेशं प्राप्य भरतः अनेकैः सह नाट्यं प्रचारितवान्।[11]

**इ.रसार्णवसुधाकरम्**

रसार्णवसुधाकरे भरतनाट्यशास्त्रोद्धृतनाट्योत्पत्तिवादः संकलितः। अत्र वैलक्ष्यण्यं न दृश्यते। इन्द्रानुरोधेन ब्रह्मा नाट्यवेदं सृष्ट्वा भरताय प्रदत्तवान्। मर्त्ये नाट्यवेदस्य प्रयोगे भरतः समर्थोऽभवत्। क्रमेण शाण्डिल्यदत्तिलमातङ्गादिनाट्याचार्यैः पृथिव्यां नाट्यं विस्तारं लेभे।

**वैदिकसंवादसूक्तमूलकमतवादः**

महर्षिभरतनिर्मिते नाट्यशास्त्रे वेदेभ्यो नाट्योपादानं संगृह्य नाट्योत्पत्तेराख्यानं समुपवर्णितम्। ब्रह्मा ऋग्वेदात् पाठ्यं गृहीत्वा नाट्यवेदं निर्मितवान् । भारतीयार्यसाहित्येषु प्राचीनतमं साहित्यं ऋग्वेदः। ऋग्वेदस्य कतिपयानि सूक्तानि विद्यन्ते, यानि कथोपकथनमूलकानि सूक्तानि संवादसूक्तानि वेति कथ्यन्ते। तेषु चतुर्दशसूक्तानि विशेषवैशिष्ट्यपूर्णानि । अयारिस्ट्टल (Aristotle) महाभागैः नाट्यस्य षडाङ्गानि स्वीकृतानि, तेषु वृत्तम् (Plot) अन्यतमम् । एतानि सूक्तानि आख्यानमूलकानि। एतेषु सूक्तेषु नाट्यस्य बीजं निहितम् इति मनीषीणां मतम्। मोक्षमूलर् (Max Muller)- महोदयानां मते इन्द्र-मरुत्-सूक्तं वैदिकयुगे अभिनयमभवत्। इन्द्र-मरुत्सूक्तस्याभिनयार्थं कोऽपि ऋषिरिन्द्ररूपं धृत्वा अपराः ऋषयो मरुतरूपं तस्यानुगामिनां रूपञ्च धृत्वाभिनयन्ति स्म।[12]

अध्यापकः लेभि (Levi)- महोदयः मोक्षमूलरमतस्यानुकुल्यं भजते। तेनोक्तं सामवेदस्य संगीतकलायाः विकाशः संसाधितस्तदा।[13] पुरुषाः नृत्यगीतैः स्वात्मानन्दं प्रकाशयामासुरिति अथर्ववेदे उल्लिखितम्।

ड.हार्टेल (Hartel)- महाभागानां मते तु ऋषिभिः संवादसूक्तानि गीतानि । सूक्तस्थबहुविधानां पात्राणां संलापः एकेनैव ऋषिणा गीयते स्म। अतो गीतं संवादसूक्तं साधारणबोध्यं नासीत्। ते सूक्तानां मर्मबोधे अक्षमा आसन्। सूक्तस्थपात्राणां संलापमनेकाः ऋषयः अगायन्। ड.हार्टेल-महाभागैः एतान् संवादसूक्तान् रहस्यात्मकनाटकानि

(Mystery Plays) इति अभिधयाभिहितानि [14]। सः 'सुपर्णाध्यायमि'ति ग्रन्थं पूर्णविकशितनाट्यग्रन्थत्वेन स्वीकरोति।

अध्यापकः श्रोयेडरः(Schroeder) हार्टेलमहाभागस्य मतं विखण्ड्य उद्घोषयति यत् यात्राविकाशात् परमेव नाट्यं पूर्णरूपं प्राप्तम्। ऋग्वेदस्य कतिपयानि संवादसूक्तानि संवादमूलकानि कतिपयानि च एकालापाकानि। एतेषु सूक्तेषु सृष्टिप्रक्रिया रूपकत्वेन वर्णिता। यम-यमी-संवादः(१०।१०), अगस्त्य-लोपामुद्रा- संवादः (१।१३९), वृषाकपिसंवादश्च प्रजननसम्वन्धीरूपकाः। [15]

यद्यपि वैदिकयुगाश्रितं किमपि नाटकमस्माभिर्न परिप्राप्तम्, नाट्यनिदर्शनञ्च नाविष्कृतं [16], तथापि एवं वक्तुं शक्यते यत् वैदिकसंवादसूक्तानि संस्कृतनाटकस्य बीजमिति। सुशिल-कुमार-दे-महाभागैरपि एतत् भारतीयनाट्यस्य आदिमतमिति स्वीकृतम् । [17]

**वैदिककर्मकाण्डाश्रितमतवादः**

वैदिकयुगे यज्ञानुष्ठाने ऋषयः न केवलं मन्त्रमगायन्तः देवतायाः स्तुतिपाठं वा अकुर्वनपि तु कतिपयानां मनोरञ्जकसंवादसूक्तानां नाट्याभिनयमप्यकुर्वन्। वैदिककर्काण्डभागस्थितस्य अग्निष्टोमयागाङ्गाभूतत्वेनानुष्ठितस्य सोमक्रयं दर्शकान् मोदयितुमृषिभिः अनुष्ठितम्। अनुष्ठानेऽस्मिन् सोमविक्रेता सोमविक्रयकाले यदा सोममूल्यं याचते तदा सोमक्रेतुः प्रहारं लभते। कात्यायन-श्रौतसूत्रानुसारेण वस्तुतः सोमस्य क्रयविक्रयप्रचलनं नासीत्। परन्तु अध्वर्युः स्वयं अपरेभ्यः सोमं प्रदाय सोमविक्रेतुः भूमिकायामवतारयामास। क्रेता-विक्रेतरौ परस्परं विवाद-कलहयोः अभिनयं कृतवन्तौ। एतेन सोमक्रयानुष्ठानम् अधिकतरं रम्यरूपं प्राप्तम्।

**लौकिकोपादानेभ्यो नाट्योत्पत्तिः**

**क.आनन्दोत्सवात् नाट्योत्पत्तिः**

केनापि धर्मानुष्ठानेन भारतीयनाट्यस्य उद्भवो न बभूव, परन्तु साधाराणजनकृताननन्दानुष्ठानेभ्यः नाट्यं जनिं लेभे-इदमुद्घोषितं हिलेब्राडन्ट् (Hillebrandt) स्टेनकेनो (Sten konow) - अध्यापकद्वयेन । तेषां नये धर्मानुष्ठानं नाट्यस्य पूर्णतररूपं प्रकाशयति।

**ख.पुत्तलिकानृत्यवादः**

जार्मानपण्डितैः पिशेलमहाभागैः पुत्तलिकानृत्यं नाट्यस्य उद्भवकारणमिति ऊररीकृतम्। पुत्तलिकानृत्यमादौ भारतवर्षे प्रचलितमासीत् । अस्मात् स्थानात् पुत्तलिकानृत्यं पृथिव्याः विभिन्नेषु स्थानेषु विस्तारमलभत। महाभारत-कथासरित्सागर-बालरामायणप्रभृतिषु ग्रन्थेषु पुत्तलिकायाः व्यवहारं परिदृश्यते। एतेषु ग्रन्थेषु कुत्रापि कुत्रापि पुत्रिका-पुत्तलि –पुत्तलिका- दुहित्रिका-दारुमयी-स्थापकशव्दानां प्रयोगः कृतः ग्रन्थकारैः। पिशेल-महोदयेन एवमनुमीयते यत् सूत्रधारविदूषकशब्दौ पुत्तलिकानृत्यात् संस्कृतनाटके अनुप्राविशताम्। परन्तु मतमिदं न सर्वैः गवेषकैः गृहीतम्। हिलेब्राडन्ट्महाभागनयस्तु विदूषकशब्दः लौकिकानुष्ठानसंयुक्तः इति। अपिच अध्यापक-कोनोमहाभागनये मूकाभिनयात् गृहीतमिदं चरित्रम् । वस्तुतः नाट्यस्य सूत्रं यः धारयति सैव सुत्रधारः। [18]

**ग.छायानाटकवादः** अध्यापकौ लुडार्स-कोनो-महाभागौ छायानाट्यं नाट्यस्यादिमरूपमित्यकथयताम्। तयोर्नये तु छायानाट्ये अभिनयप्रमाणं प्राप्यते। पातञ्जलमहाभाष्ये 'शौभिक" शब्दस्य प्रयोगः दृष्टः। शौभिकशब्दः मूकाभिनेतारं निर्दिशति [19]। ते यवनिकानन्तरालस्थितपात्रस्य निर्वाक्-छायां माध्यमीकृत्वा मञ्चे संलापयन्ति स्म। पूर्वप्रचलितात् छायानाट्यकलादेव नाट्यस्य उद्भवोऽभवत्। महाभारतोल्लिखितशब्दः 'रूपजीविन्' वराहमिहिरकृतवृहत्समहितास्थितः' रूपजीवी' च द्वौ शब्दौ तत् प्रमाणीकुरुतः। [20] भवभूतेः उत्तररामचरितस्य नाटकस्य तृतीयाङ्के छायासीतायाः संयोजनं छायानाट्यवादं दृढीकरोति। रत्नावली-प्रबोधचन्द्रोदयनाटकादिषु दशकुमारचरिते च वर्णितः ऐन्द्रजालिकः वस्तुतः छायानाट्यकारः एव । मतमिदं किथमहाभागैः खण्डितम्। [21]

**घ.वीरपूजा प्रेतात्मवादः**

अध्यापकः रिजओये महोदयः नाट्यस्य उद्भवकारणत्वेन वीरपूजां प्रेतात्मवादञ्च स्वीकरोति। मृतवीरपुरुषस्यात्मानं प्रति श्रद्धाज्ञापनार्थं नृत्यगीतवाद्याभिनयस्य प्रचलनमासीत्। तस्मात् नाट्यं जातम्। किन्तु वादोऽयं न ग्राह्यः। धर्मोत्सवानन्दोत्सवौ उपलक्ष्य भारतवर्षे नाट्यमाविर्बभूव।

**ङ.लोकोत्सववादः**

भारतीयनाट्यविकाशे लोकपरम्पराजातजातीयोत्सवानां महती भूमिका वर्तते। रामायणमहाभारतपुराणकालस्थितासु सभ्यतासु रामलीला, कृष्णलीला, दुर्गापूजा महोत्सवश्च धर्मोत्सवत्वेन परिगणिताः। एतेषु लोकोत्सवेषु कृष्णलीला तथा कृष्णोपासना संस्कृतनाट्यजन्मदात्रेति किथमहाभागस्यमतम् [22]।

**संस्कृतनाट्ये ग्रीकप्रभाववादः**

भारतीयसंस्कृतनाट्योत्पत्तौ वेवेर् (Weber)- महाभागः प्राथम्येन ग्रीकप्रभाववादमुत्थापितवान्। खीष्टपूर्वचतुर्थशतके ग्रीकसम्राट् आलेकजान्डारः सिन्धुनदमतिक्रम्य भारतवर्षस्य

उत्तरपश्चिमप्रदेशान् प्रविश्य राज्यानि अधिकृतवान्। अधिकृतेषु राज्येषु ग्रीकप्रभावः सम्यक्तया विस्तारं प्रापत्। आलेकजान्डारेण सह आगताः नाट्याभिनेतारः स्वदेशवासिनां मनोरञ्जनार्थं व्याकटिरियाराज्यस्य गुजराट्-पञ्जावयोः अश्वलेषु नृत्य-गीतैः सह नाट्यमभिनीतवन्तः। ग्रीकदेशः नाट्यकलाविषये भारतवर्षात् अग्रगामी आसीत्। ग्रीकराजस्य मिनान्दरस्य शासनकाले भारतीयनाट्ये ग्रीकप्रभावः गभीरतरोऽभवत्। अतो ग्रीकनाट्यानुकरणेन भारतवर्षे नाट्योत्पत्तिरिति सिद्धान्तः बेवर-महोदयैः गृहीतः। मतमिदं पाश्चात्यपण्डितौ भिण्डिश-उइण्डिश (Windisch) महाभागौ समर्थयतः। तेषां नये भारतीयनाट्ये ग्रीकप्रभावस्य हेतवर्यथा- प्रथमतः – ग्रीकाधिकृतभारतीयप्रदेशेषु ग्रीकनाट्यस्य प्रचलनम् । द्वितीयतः – ग्रीकनाट्यवस्तुभिः सह भारतीयनाट्यवस्तुनः सायुज्यम्। तृतीयतः – दाओनिसासदेवतया सह अनार्यदेवस्य शिवस्य सादृश्यम्। चतुर्थतः – वृत्त-स्थान-काल-त्रिविधैक्यसाधनम्। पञ्चमतः – भारतीयनाट्ये 'यवनिका' इति ग्रीकशब्दस्य प्रयोगः। षष्ठतः – उभयनाटके चरित्रसादृश्यानि।

भिन्डिशमहोदयानां मते संस्कृतनाट्यवर्णितस्य महिषीचरित्रस्य रोमानकमेडि 'मेत्रोना (Metrona) चरित्रेण सह ऐक्यं वर्तते।

एतानि मतानि निराकृतानि भारतीय-पाश्चात्यनाट्यतत्त्वविद्भिः। महामतेः गौरीनाथशास्त्रिणः मते भरतवर्षे आलेकजान्डारस्य आगमनात् प्रागेव नाट्यं विस्तारं अलभत। ग्रीकनाट्यं ट्राजेडि (Tragedy)-कमेडि (Comedy)- स्याटिर (Satire)- विभागत्रयेन रचितम्, परन्तु भारतीयनाट्यं बहुधा विभक्तम् । नाट्यशास्त्रकारेण भरतेन दशविधं रूपकं स्वीकृतम्। ग्रीकनाट्ये त्रिविधमैक्यं सुप्रसिद्धमं, किन्तु भारतीयनाट्ये वृत्त-स्थान-कालानां समता न रक्षिता। महाकवेः कालिदासस्य अभिज्ञानशाकुन्तले शूद्रकस्य मृच्छकटिके च प्रभृतिषु नाटकेषु त्रिविधमैक्यं न रक्षितम्। ग्रीसदेशजाता 'यवनिका' इति पर्दाविशेषस्य व्यवहारात् भरतीयनाट्यं ग्रीकप्रभावसम्भूतमिति मन्यन्ते ये जना स्तैर्न सम्यक्सिद्धान्तितम्। इदानीं नाट्यमञ्चस्य सम्मुखभागस्थितपर्दाविशेषो हि 'यवनिके'ति कथितम्। नाट्यस्य प्रारम्भे यन्निकापसारणेण नाट्यारम्भं भवति, पुनः नाट्यान्ते तत्पतनेन नाट्यसमाप्तिश्च भवति। परन्तु पुरा भारतवर्षे नाट्यमञ्चस्य सम्मुखभागे ईदृशी यवनिका नासीत्। तदा मञ्चस्य पश्चाद्भागे रङ्गपीठरङ्गशीर्षयोः मध्यवर्तीस्थाने व्यवहृतः यवनिकाविशेषः यवनिका नामधेयेनाभिहितम्। प्राचीनकाले ग्रीकदेशागतः मानवः 'यवनः' इत्यनेन शव्देनाभिहितः । तदा भारतवर्षीयेन नृपतिना संयुधि विजिताः नार्याः अपि 'यवनी' इति संज्ञयाभिहिता अभवन् । अतो यवनी,यवन वेति शब्दात् यविनिका शब्दस्याविर्भावः। परन्तु एतत् न सम्यक् सिद्धान्तः। यतः पुरा सर्वे वैदेशिकाः यवनाः इत्यनेन अभिहिताः। अतो कथमुच्यते – यवनिका ग्रीसदेशजातपर्दाविशेषः इति ? अधिकन्तु 'यवनिके'ति शब्दः संस्कृतस्य युधातुजः । ग्रीकमञ्चं समवेतसङ्गीत(कोरास)-केन्द्रिकम्। तत्र यवनिकायाः व्यवहारः प्रचलितो नासीत् । अतः कथं वक्तुं शक्यते यत् – भारतीयनाट्यं ग्रीकप्रभावसम्भूतमिति। ड. सुकुमार- सेन-महोदयमते यवनिकया सह यवनः (ग्रीसदेशस्थव्यक्तिः) शाब्दस्य किमपि सम्पर्कं नास्ति। यवनिका वस्तुतः प्रावारकविशेषः। [23] न ग्रीकनाट्याभिनेतृभिः मुखोश (Musk) इति द्रव्यं व्यवहृतम्। भारतीयनाट्ये अभिनेतरः रञ्जकद्रव्येन आत्मानं रञ्जयन्ति स्म।

**मिशरदेशे नाट्योत्पत्तिः**

सुप्राचीनकालतः नदीमुभयतः याः सभ्यता विकशितास्तासु मिशरसभ्यता अन्यतमा प्रचीनतमेति मन्यन्ते प्रत्नतात्विकगवेषकाः। ५००० प्राक्ईषवीये वर्षे नीलनदमुभयतः मिशरसभ्यता विकशिता । मिशरदेशे पिरामिड टेक्सट् (Pyramid Text), मेफाइट् ड्रामा वेति नाटकनिदर्शनं प्राप्तम् प्रत्नतात्त्विकैः। ओसिरिस्-देववृत्तम् 'एवाइदोस प्यासन प्ले (Abydos passion play )'इति नाम्ना मिशरदेशे यत् प्रचलितं तत्तु 'आदिमतमं नाटकमि'ति संज्ञयाभिहितम्।

मिशरदेशे ओसिरस्-देववृत्तं सुप्रसिद्धम्। ओसिरिस् जुपितेरनीयोवी-मातापितरयोः पुत्रः आसीत्। सः स्वराज्ये कृषिं प्रवर्त्य बर्हिर्देशं कृषिप्रसारणार्थं गतः। इथिओपिया-भूखण्डं संप्राप्य तत्र कृषिं प्रवर्तितवान्। 'स्याटिर्'(satire)-सम्प्रदायः तेन सह मिलितोऽभवत्। ओसिरिस्-देवः अनेकविधानि भूखण्डानि परिभ्रम्य यदा स्वदेशं प्रत्यागतस्तदा ताइफोन् इति तस्य भ्राता तं जघान। ओसिरिसपत्नी इशिस्-देवी तस्य खण्डविखण्डितदेहांशं पुनः प्राप्य पुरोहितानाहूय भर्तुः मूर्तिं निर्माणाय आदिदेश। मिशरस्य पुरोहितसम्प्रदायेण बृषभः ओसिरिसस्य विकल्पत्वेन प्रतिनिधिरूपत्वेन वा गृहीतः। बृषभोऽयं सप्तदिवसं ब्राह्मणैः पूजितः। षण्डे मृते पुरोहिता मुण्डितमस्तकं सन्तः सततं विलापयन्तः गभीरे शोकसागरे च निमज्जितवन्तः। पुनः सुलक्षणं वृषभमेकं प्राप्य - ओसिरिस् इति देवः पुनर्जीवनं प्राप्नोतीति मत्वा हृष्यन्ति। इदमेव ओसिरिस्-वृत्तमेव मिशरस्य प्राचीननाट्यवस्तु इति पुरावृत्तमस्माभिर्लभ्यते। [24]

**ग्रीसे नाट्योत्पत्तिः** ग्रीसदेशे नाट्योद्भवं तस्य विकाशस्य च इतिहासः अधुना लब्धः। अयारिस्ट्टल (Aristotle)-महाभागैः पोयेटिक्स्(Poetics) इति काव्यतत्त्वविषयकग्रन्थः (३६०-३२२ख्रीष्टपूर्वाब्दे) विरचितः। एस्काइलास्(Aeschylus)-सफोक्लिस्(Sophocles)-एरिपिदेस्(Euripides)-एरिस्तोफिनिस्(Aristophines)-प्रभृतिनाट्यकाराणां नाट्यग्रन्थानां परिचयं प्राप्तम्।

सुप्राचीनकालस्था ग्रीकसभ्यता मिशरसभ्यताया अर्वाचीनत्वं भजते । "एटिका" इति नामधेये अधिष्ठाने ग्रीकवासिनः मिशरवासिभ्यः कृषिविद्यां शिक्षितवन्तः इति लोकश्रुतिः प्रचलिता। मिशरस्य प्रागैतिहासिका ओसिरिस्-ईशिस्-लोककथा डिमितेर्-डाओनिसास्-ग्रीकजनश्रुत्या सह ऐतिहासिकैस्तुलिता। "ओसिरिस्-कथा" – इयारस्पिरिटरूपत्वेन प्रचलिता, तथा ग्रीसदेशे "एलिउथेराइ-डाओनिसास्-वृत्तमपि इयारस्पिरिटत्वेन प्रचलितम्।

शीतकाले प्रकृतिं शुष्कतां आप्नोति, पुनः ग्रीष्मे प्राप्ते सजीवत्वं लभते। प्रकृत्या परिवर्तनमिदं प्राज्ञगवेषकैः ज्यानथोस्-म्यालान्थोस्- पुरुषद्वयस्य चिरद्वन्द्वत्वेन वर्णितम्। द्वन्द्वोऽयं ग्रीसे नाट्योत्पत्तेः मूलमिति फार्णेल-महोदयस्य मतम्। गवेषको गिलवार्ट्- मारि-महोदयोऽपि मतमिदं परिपोषयति।

ग्रीकगोष्ठीसमाजस्य दीक्षाविधि–अनुष्ठानात् परमेव "डाओनिसास-उपासना" प्रचलिता। प्राक्-ईषवीये षष्ठशताब्द्यां कोरिन्थेर-टाइरान्ट्-राजस्य अनुग्रहे डाओनिसास्-उपासनायां डिथिराम्ब् इति समवेतगीतं जना अगायन्। ततः कियत्कालात् परमेव टाइरान्ट्- पेइसिस्-ट्रोटास्-राजस्य आनुकुल्येन डाओनिसास्-उत्सवः जातीय-उत्सवपदवीं लेभे।

डिथिराम्व-जातीय-उत्सवतः नाट्यं संबभूव। ग्रीसदेशस्य थिवस्-नगर्य्यां सिटि- डाओनिसिया-उत्सवक्षेत्रे डाओनिसास्-देवताख्यानमिदं सुप्रसिद्धम्।

ग्रीकस्य जिउसदेवस्य कदमोसदुहितायाः सिमिलिप्रेम्नि सम्महितोऽभवत्। जिउसपत्नी हीरा प्रतिहिंसया सिमिलिं विपथि परिचालयति स्म। जिउसस्य प्रकृतरूपं द्रष्टुकामा सिमिलिः जिउसमुपतिष्टति । तस्याः अनुरोधात् जिउसदेवः प्रकृतरूपप्राकाशे वज्राघातेन सा दग्धा सती पञ्चत्वं प्राप्ता। तदा जिउसदेवः सिमिलिगर्भस्थितभ्रूणं ऊरसि प्रथितवान्। संप्राप्ते काले डाओनिसास् इति पुत्रो जनिं लेभे।

क्रीटदीपे तु अपरा जनश्रूतिः प्रचलिता। जिउसदेवः डाओनिसास इति शिशुपुत्राय अतीव अस्निह्यत्। तस्य पुत्रस्नेहं वीक्ष्य कुपिता हीरा डाओनिसास्- नामधेयं शिशोः हननाय टिटान्-जनगोष्ठीं नियुक्तवती। समयेऽस्मिन् कौरितिस्-जनगोष्ठी डाओनिसास् इति शिशुपुत्रं पालितवान्। टिटानगोष्ठीभुक्तपुरुषाः वालकं डाओनिसासं चौरयित्वा अस्त्रैः खण्डविखण्डं कृतवन्तः। डाओनिसास्य मृत्युसंवादं निशम्य कोपाविष्टो जिउसदेवः निजायुधेन वज्राघातेन टिटानगोष्ठीभुक्तपुरुषान् हतवान्। अलौकिकोपायैः डाओनिसासं पुनर्जीवनं प्राप्तवान्।

यद्यपि डाओनिसास्-देवतामवलम्व्य कश्चित् नाटकमपि अधुना न लभ्यते, तथापि डाओनिसास्-देवतार्चनामुपलक्ष्य ग्रीसदेशे नाट्यप्रतियोगिता प्रचिलिता आसीत्। तस्यां प्रतियोगिसभायां एइस्किलास्-कवेः साप्लियान्ट् इति नामधेयकं नाटकमभिनीतम्। 'विश्वनाटकम्'(World Drama) इति ग्रन्थे निकेल-महोदयेन नाट्याभिनयकथा समुपवर्णिता। 25

**निष्कर्षः**

नाट्योत्पत्तिविषये नाट्यशास्त्रोक्तदेवब्रह्माकर्तृकनाट्योत्पत्तिवादोऽ-भिनयदर्पणोद्धृतशैवनाट्योत्पत्तिवादश्च व्यतिरिक्तमर्वाचीनकाले च नाट्योत्पत्तितत्त्वज्ञैः यानि मतानि उपस्थापितानि, तानि सम्यक्पर्यालोच्य एतद् वक्तुं न शक्यते यत् कस्मिन् वादे नाट्योत्पत्तेः मूलं निहितमिति। विषयेऽस्मिन् प्रत्यक्षप्रमाणाभावः परिलक्षितः। प्राचीनेषु अभिलेखेषु नाट्योद्भवविषयं न लिखितम्। मानवजातेः क्रमोन्नतेः इतिहासात् प्रमाणितं यत् अनुकरणं हि नाट्योत्पत्तेर्मूलम्। सुप्राचीनकालाद् मानवस्य अनुकरणप्रवृत्तिः लक्षणीया। आदौ मानवाः हस्तपदादिसञ्चालनैः आनन्दानुभूतिं प्रकाशन्ति स्म। अङ्गसञ्चालनं हि नृत्तम्। वाद्यादिसहयोगेन भावाभिनय: तु नृत्यम्। प्राग्वैदिकयुगे अनार्याः द्राविडाः शिवस्योपासनाकाले नृत्यं गीतञ्च अकुर्वन्। दक्षिणभारते शिवोपासनं केन्द्रीकृत्य नाट्यस्य भित्तिभूमिं विनिर्मितेति अनुमीयते। शिवोपासनाकाले नाट्यमप्यभिनीतमभवत्। यद्यपि कश्चिदपि नाट्यग्रन्थोऽस्माभिर्नोपलब्धः, तथापि एवं वक्तुं शक्यते यत् प्रागार्ययुगे भारतवर्षस्य दक्षिणाञ्चले नाट्यस्य भ्रूणावस्था संसृष्टा इति। परवर्तिनि काले वैदिकसभ्यतायां सः भ्रूणः क्रमशः पूर्णावयवदशां प्राप्तः। पाश्चात्यमनीषिभिः अरिस्टटल(Aristotle)महाभागैः नाट्यस्य षडाङ्गं स्वीकृतम्। तेषु नृत्यमन्यतमम्। ऋग्वेदस्य संवादसूक्तानि नाट्यस्य संलापत्वेन परिगणितानि जातानि। कीथमहाभागैरपि वैदिकयज्ञे धर्मीयक्रियाकलापं नाट्यस्यवीजत्वेन स्वीकृतम्। 26 कृत्स्नं धरायां धर्मानुष्ठानमुपलक्ष्य नाट्यस्य प्रादुर्भाव इत्यस्मिन् विषये नास्ति सन्देहावसरः। ग्रीसदेशे डाओनिसासदेवोपासनां मिशरे च ओसिरिस्-देवार्चनामुपलक्ष्य नाट्यस्य आविर्भावः संबभूव। भारतवर्षे वैदिकयुगे

धर्माचारणोपायभूतयज्ञकर्मन्युष्ठितनानाभिनयमूलकानुष्ठानात् नाट्यं जनिं लेभे।

## तथ्यसूत्राणि

1. General Anthropology, Ed. Franz Boas, D.C. Heath And Company, London page 125
2. Ibid page 125
3. "Specially important in this context is the dance which our premitive ancestors performed before going out to hunt. Some of them dressed up as hunters and the others as the hunted animals, dancing a mimic hunt in which of course, the hunters invariably won." – Mulk Raj Anand-The Indian Theatre, London, First Ed p. 17.
4. Thus dance is a great mother of art, religion and erotics. Ibid. p- xiv
5. "The earliest dramas were religious in character and they were performed on religious occasion." H. R. Aggarwal, A Short History of Sanskrit Literature, p-183
6. The fact remains that prior to the arrival of Aryans India had a race of city-dwelling, artistic, prosperous and cultured people, who were great traders and indulged freely in the pleasures of life. I. Shekhara, Sanskrit drama, page- xviii.
7. मन्मथमोहन-वसु, वांला नाटकेर उतपत्ति ओ क्रमविकाश, कलकाता विश्वविद्यालय,१९५९,पृ-८।
8. तदेव पृ-११।
9. नाट्यवेदं ददौ पूर्व्वं भरताय चतुरर्म्मुखः।
ततश्च भरतः सार्द्धं गन्धर्वाप्सरसां गणैः।।२॥
नाट्यं नृत्तं तथा नृत्यमग्रे शम्भोः प्रयुक्तवान्।
प्रयोगमुद्धतं स्मृत्वा स्वप्रयुक्तं ततो हरः।।३॥
तण्डुना स्वगणाग्रण्या भरताय न्यदीशत्।
लास्यमस्याग्रतः प्रीत्या पार्वत्या समदीदिशत् ।।४॥ - नन्दीकेश्वरः, अभिनयदर्पणम्, सम्पा, ओगौरिनाथ- शास्त्री, नवपत्रप्रकाशन, १९९१, पृ-२-३।
10. तदेव पृ- ३।
11. सारदातनयः, भावप्रकाशनम्,सम्पा. शास्त्री, के.एस्.रामस्वामी. यतिराज, यदुगिरि बरोडा ओरियेन्ताल इन्सटिटिउट्. १९६८. (द्विती. सं). पृ-४५
12. He conjectured that the 'dialogue was repeated at sacrifices in honour of the Maruts or that possibly it was acted by two parties, one representing Indra, other the Maruts and their followers'. - A.B. Keith, Sanskrit Drama, page -15.
13. In 1890 the suggestion was repeated with approval by Professor Levi who added to it the argument that the Sãmaveda shows that the art of music had been fully developed by the Vedic age.- Ibid page 15
14. Ibid page- 16
15. Ibid page-१५
16. The actual drama was nonexistence in Vedic period. –. H.R. Aggarwal. A Short History of Sanskrit Literature, Page- 183
17. It has been claimed that here we have the first signs of the Indian drama. – S. K. De History of Sanskrit literature, page- 44.
18. नाटकीयकथासूत्रं प्रथमं येन सूच्यते।
रङ्गभूमिं समाक्रम्य सूत्रधारः स उच्यते ।।
19. Keith AB. Sanskrit drama, page-53.
20. वृहत्संहिता ५।७४।
21. Keith AB. Sanskrit drama, page- 55
22. Ibid page- 45
23. ड. सुकुमार-सेन, नट नाट्य नाटक, पृ-२३

## परिशीलितग्रन्थाः


### संस्कृतग्रन्थाः

1. भरतः, नाट्यशास्त्रम्, सम्पा., के.एस्.जोशी (अभिनवभरती टीकासमेतम्), रस्तोगी सुधा, परिमल पावलिकेशन, दिल्ली (प्रथमसंस्करण) १९१७।
2. रामचन्द्रगुणचन्द्रः नाट्यदर्पणम्, सम्पा. एल्.डि. गान्धी, गायकवाड
3. ओरियेन्टाल सीरीज बडौदा, १९२९।
4. धनञ्जयः, दशरुपकम् सम्पा. आचार्य. सीतानाथः, दास देवकुमारः, संस्कृत पुस्तकभाण्डारम् (तृतीयसंस्करणम्), २०१२।
5. सागरनन्दी, नाटकलक्षणरत्नकोशम्, सम्पा, चट्टोपाध्यायः. सिद्धेश्वरः, संस्कृत –पुस्तकभाण्डारम्, १३८५।
6. सारदातनयः; भावप्रकाशनम्, सम्पा. शास्त्री, के.एस्.रामस्वामी. यतिराज, यदुगिरि बरोडा ओरियेन्ताल इन्सटिटिउट्, १९६८. (द्विती. सं)।
7. रूपगोस्वामी, नाटकचन्द्रिका, शुक्ल. बाबुलालः चौखम्वा संस्कृतसिरिज, १९६४।
8. विश्वनाथः, साहित्यदर्पणम् सम्पा. सिद्धान्तवागीशः, हरिदासः, संस्कृतवुकडिपो, कलिकाता।
9. नन्दिकेश्वरः, अभिनयदर्पणम्, सम्पा, ओगौरिनाथ-शास्त्री, नवपत्रप्रकाशनम्, १९९१।
10. शिङ्गभूपालः, रसार्णवसुधाकरम्, सम्पा, टि.गणपति शास्त्री, त्रिवान्द्रम-संस्कृत-सिरिज, १९१६।
11. नाट्यशास्त्रम्, भरतः, सम्पा. ड.पारसनाथ-द्विदेवी, वाराणसी, २०१५।
12. वाल्मीकि, रामायणम्, सम्पा, पञ्चानन-तर्करत्नः, वेणीमाधवशील-लाइब्रेरी, २०१४।

### आंरेजीग्रन्थाः

1. Aggarwal HR. A Short History of Sanskrit Londan M.M. Publisher Pvt. Ltd., New Delhi, 1963.
2. Shekhara I. Sanskrit Drama: Its Origin and Decline, Leided, E.J.Brill, 1960.

3. De SK. History of Sanskrit literature, University of Calcutta, 1947.
4. Keith AB. The Sanskrit drama. In Its Origin Development Theory and Practice, Motilal Banarasidas, first Ed. India, 1992.
5. Patanjali Vyakarana Mahabhasya, Etd by Vyakaranacharya Pandit R. k. Shastri & M.P. S.D.Kudala Bombay 1937, iii.
6. Krishnamachariar M. History of Classical Sanskrit Literature, Tirumalai-Tirupati Devasthanams Press, Madras, 1937.
7. General Anthropology. Ed. Franz Boas, D.C. Heath And Company, Londan, 1938.
8. Mulk Raj Ananda. The Indian Theatre, London, First Ed, 1950.
9. World Drama. An Anthology, Ed, Barrett H. Clark,Dover Publications INC, USA, 1933.

**वङ्गभाषाश्रितग्रन्थाः**

1. ड. भट्टाचार्य साधनकुमार, नाट्यतत्त्वमीमांसा, कलकाता, षष्ठप्रकाशन, २०१४।
2. वसु मन्मथमोहन, वांला नाटकेर उत्पत्ति ओ क्रमविकाश, कलकाता विश्वविद्यालय,१९५९।
3. भरत, नाट्यशास्त्रम, सम्पा. सुरेशचन्द्र-वन्द्योपाध्याय, नवपत्रप्रकाशनम,चतुर्थखण्डम,२०१४, पृ-२४२।